Gyanshauryam, International Scientific Refereed Research Journal
© 2020 GISRRJ | Volume 3 | Issue 3 | ISSN : 2582-0095

# श्रीमद्भगवद्गीतायां समाजशिक्षा



डॉ.भाग्यसिंहगुर्जरः
सहायक प्रोफेसर, शिक्षाविभागः
केन्द्रीयसंस्कृतविश्वविद्यालयः
श्रीसदाशिवपरिसरः, पुरी, (ओडिशा)

**शोधालेखसारः** – शिक्षा बालकं समाजाय निर्माति सिद्धं च करोति। शिक्षोद्देश्यानि समाजानुगुणं भवन्ति। बालकः स्वविकासेन सह समाजस्य विकासमपि कर्त्तुं प्रभवति। शिक्षकः समाजस्य मूल्यैः, संस्कृत्या, आकांक्षाभिः, परम्पराभिश्च सुपरिचितः स्यात्। एतद् आधारेण समाजस्यावश्यकतानुगुणं बालकानां निर्माणं कर्त्तुं शक्यते। सामाजिकोन्नयनार्थं तस्य विकासः विधीयते।
**मुख्यशब्दः** – शिक्षा, बालक, शिक्षकः, भारतदेशः,श्रीमद्भगवद्गीता,सामाजिकशिक्षा,मूल्य।

भारतदेशः कर्मभूमिः वर्त्तते। अस्यां कर्मभूमौ सामाजिकशिक्षायाः स्थानं प्रमुखमस्ति। श्रीमद्भगवद्गीता समाजनिर्माणाय अन्यतमोऽपरिहार्यो ग्रन्थो भवति। श्रीमद्भगवद्गीतायां व्यक्तिसमाजयोर्मध्ये मौलिकभेदः न स्वीकृतः। व्यक्तिः समाजश्च एकैव भागस्य आयामद्वयमस्ति। अनयोः द्वयोर्मध्ये भेदः प्रत्ययात्मकः न तु वास्तविकः। व्यक्तिशिक्षा कृते सामाजिकशिक्षाऽपि आवश्यकी भवति। प्रत्येकं समाजे राज्यस्य सङ्कल्पना अभिहिता विद्यते। प्रत्येकं व्यक्तिः राज्यस्य नागरिकः वर्त्तते। अतः नागरिकतायै शिक्षा सर्वेषां कृते अत्यावश्यकी। समाजे स्त्रीपुरुषयोः सामाजिककार्यभारः समानं न भूत्वा परस्परं पूरकत्वं भवति। अतः कार्यभागानां भेदानुरूपं मानवसमाजेषु बालक-बालिकानां शिक्षाप्रकारेषु विभेदः क्रियते। विभिन्नराष्ट्राणां लक्ष्येषु, संस्कृतिषु, जीवनप्रणालिषु, मूल्येषु च न्यूनाधिकभेदेन राष्ट्रियशिक्षायाः विविधप्रकाराः समुत्पन्नाः। तथापि सर्वेषां राष्ट्राणां परस्परं साहाय्यस्य आवश्यकतया अन्ताराष्ट्रियतायाः शिक्षाऽपि शिक्षायाः एकः महत्त्वपूर्णः प्रकारः वर्तते। श्रीमद्भगवद्गीतायां सामाजिकशिक्षायाः परिप्रेक्ष्ये सामाजिकमूल्यादर्शः, सामाजिकोत्तरदायित्त्वं, सामाजिकोद्देश्यञ्च एतानि तत्त्वानि प्रमुखतया सन्ति। प्रपञ्चेऽस्मिन् मानवः अत्युत्तमो प्राणी भवति। मानवजीवनं पशुजीवनात् भिन्नधर्ममूल्यानामुपरि आधारितं भवति। मानवस्य श्रेष्ठत्वं धर्ममूल्यानां कारणैः वर्तते। उच्यते च-

**आहारनिद्राभयमैथुनञ्च सामान्यमेतद् पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिसमानाः॥ 1॥**

मूल्यानां साक्षात्कारः एव मानवीयता विद्यते। मानवसमाजः जीवनञ्च नैरुतर्येण परिवर्त्तनशीलं भवति। प्रत्येकं व्यक्तेः विश्वस्मिन् विश्वे मनुष्यैः सह परोक्षसम्बन्धः अस्ति। एवमेव भूत-वर्तमान-भविष्येऽपि सम्बन्धं द्रष्टुं शक्यते। अतः विशिष्टसार्वभौमिकदेशकालपरिस्थित्याधारेण शिक्षाप्रकारेषु विभेदः कर्त्तुं शक्यते। आदर्शशिक्षाव्यवस्थायां मानवरचनायाः समेषाम् आयामानां, समाजस्य समेषां कार्याणां, सर्वेषां मानवीयमूल्यानाञ्च कृते शिक्षाव्यवस्थया भवितव्येति। भारतीयसंस्कृतिः समन्वयशीला वर्तते। समन्वयशीलता मानवतायाः मूल्यं पाठयति। श्रीमद्भगवद्गीतायां साधनापद्धतीनां समन्वयः दर्शितः। यथा-

**यत्साख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते।**
**एकं सांख्यं च योगः च यः पश्यति स पश्यति॥ 2॥**

मानवमनसः तिस्रः प्रवृत्तयः सन्ति- क्रिया, भावः, ज्ञानञ्च। एतेषां कर्माधिक्येन संसारे त्रिप्रकारकाः व्यक्तयः प्राप्यन्ते। यथा- सङ्कल्पप्रधानव्यक्तिः, भावप्रधानव्यक्तिः, ज्ञानप्रधानव्यक्तिश्च। सङ्कल्पप्रधानव्यक्तेः व्यक्तित्वे क्रियात्मकपक्षस्य प्राबल्यं भवति। एतादृशाः मनुष्याः बहिर्मुखिनः प्रवृत्तिप्रधानाश्च भवन्ति। भौतिकसुखसौकर्यस्य नूतनानि लक्ष्याणि निर्धारयन्ते प्राप्त्यर्थं च प्रयासान् कुर्वन्तीति। भावप्रधानव्यक्तेः व्यक्तित्वे भावना प्रधाना भवति। भावप्रधानव्यक्तयः भावुकाः अन्तर्मुखिनश्च भवन्ति। एतेषां जीवने निर्णयतर्कयोः स्थाने भावना प्रधाना भवति। साहित्यकाराः कवयश्च अस्मिन् वर्गे समायान्ति। ज्ञानप्रधानव्यक्तेः व्यक्तित्वे ज्ञानात्मकपक्षस्य प्राधान्यं प्राबल्यञ्च भवति। अस्य वर्गस्य जनाः चिन्तनमननकार्यपरिणामोपरि विचारं कृत्वा एव कार्याणि कुर्वन्तीति। निष्कामसन्देशः अस्माकम् आवेगानाम् आध्यात्मिकरणं करोति। विषयेऽस्मिन् विस्तरेण श्रीमद्भगवद्गीतायां स्पष्टीकृतम्-

**सन्यासस्तु महाबाहो दुःखमाप्तुमयोगतः।**
**योगयुक्तो मुनिर्ब्रह्म नचिरेणाधिगच्छति॥ 3॥**

मानवः स्वार्थसिद्ध्यर्थं चेष्टां करोति। परन्तु चेष्टा स्वार्थसिद्ध्यर्थं नैव भवति। निजस्वार्थस्य कृते कृतकर्मभिः विकृतयः विपत्तयश्च उत्पद्यन्ते। एतेन कर्मतुच्छं बन्धनकारकञ्च भवति। बन्धनात् मुक्तिः, सानन्देन जीवनयापनमेव मानवस्य लक्ष्यमस्ति। एतत् लक्ष्यं प्राप्त्यर्थं मानवसेवा विधेया। सा सेवा एव हितं कल्याणञ्च साधयति। अस्मिन् एव सन्दर्भे श्रीमद्भगवद्गीतायां लोकसंग्रहस्य समुल्लेखः भगवता श्रीकृष्णेन विहितः-

**कर्मणैवहि संसिद्धिमास्थिता जनकादयः।**
**लोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसि॥ 4॥**

न्यायदृष्टिकोणे सामाजिकसन्तुलनं परमपुरुषार्थः वर्तते। महानिर्वाणतन्त्रे लोकश्रेयः नैतिकमानकमस्ति। श्रीमद्भगवद्गीतायां सर्वभूतहितम् आदर्शत्वेन स्वीकृतः। सर्वभूतानां हितेः रतः जनः ईश्वरं प्राप्नोति-

**मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः।**
**निर्वैरः सर्वभूतेषु यः स मामेति पाण्डवः॥ 5॥**

**सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः।**
**ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः॥ 6॥**

सर्वभूतहिताय विद्वज्जनः अनासक्तो भूत्वा कर्म कुर्यात्। समस्तभूतानि प्रति अहिंसा, अक्रोधः, करुणा, सत्यः, सद्भावना, परोपकारादिधर्माणां परिपालनं दैवीसम्पद् लक्षणं स्वीकृतम्। दैवीसम्पद् नाम ईश्वरीयगुणाः, येषाम् अभ्यासेन मनुष्यः परमलक्ष्यं मोक्षं प्राप्नोतीति –

**तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता।**
**भवन्ति संपद दैवीमभिजातस्य भारत॥ 7॥**

समाजे प्रत्येकं व्यक्तेः स्थानं तस्य मानसिकरुचिनाम् अनुरूपं निर्धारितमस्ति। व्यक्तिः समाजे स्वस्थानानुरूपं कर्त्तव्यस्य परिपालनेन सह सामाजिकं हितं परिवारहितञ्च प्रत्यक्षाऽप्रत्यक्षत्वेन साधयति एव। सामाजिकं कल्याणं परमपुरुषार्थरूपे श्रीमद्भगवद्गीतायां विविचितम्। परमपुरुषार्थसन्दर्भे एव स्वधर्मस्य परिपालने बलमपि प्रदत्तम्। गुणकर्मयोः आधारेण भगवता श्रीकृष्णेन चातुर्वर्ण्यं सृष्टम्। निर्धारितकर्मसम्पादनमेव स्वधर्मः भवति। एनमेव सहजकर्म, स्वकर्म, नियतकर्म, स्वभावकर्म, स्वभाव-नियतकर्म इत्यादि प्रतिपादितम्। अत्र धर्मशब्दः कर्मणः कर्त्तव्यस्य वा अर्थे प्रयुक्तः। अत एव स्वधर्मस्य श्रेष्ठता स्वीकृता। आकर्षकः सन् धर्मेण गुणरहितस्वधर्मः श्रेष्ठः। स्वभावेन नियतकर्म यः जनः करोति सः पापं नैव प्राप्नोति। तद्यथा-

**श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात्।**
**स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्विषम्॥ 8॥**

अतः मानवः सर्वदा सहजकर्मणि प्रवर्तेत। दोषयुक्तसहजकर्म कदापि न त्याज्यः। यतोहि प्रत्येकं कर्म येन केनापि दोषेण आवृत्तः भवति। उक्तञ्च-

**सहजं कर्मकौन्तेय सदोषमपि न त्यजेत्।**
**सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ।। 09 ।।**

सामाजिकजीवनस्य समस्ताः उपायाः श्रीमद्भगवद्गीतायाम् एव उपपादिताः सन्ति। सामाजिकज्ञानेन कर्त्त्व्याधिकारयोः ज्ञानं बहुविधं सामाजिकविज्ञानात्मकं च ज्ञानं जायते। येन मानवः सुन्दरं जीवनं निर्वहणे समर्थो भवति। उक्तञ्च-

**स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः ।**
**स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु ।। 10 ।।**

दैनन्दिनजीवनस्य विहाराहारआचारविचारादयः भगवता श्रीकृष्णेन स्पष्टतया प्रतिपादिताः। यथा -

**युक्ताहारविहारस्य युक्तचेष्टस्य कर्मसु।**
**युक्तस्वप्नाववोधस्य योगो भवति दुःखहा ।। 11 ।।**

**ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते।**
**सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते ।। 12 ।।**

**क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः ।**
**स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ।। 13 ।।**

अतः इन्द्रियसंयमो सामाजिकजीवने साफल्यस्य साधनं भवति। तथा च संयमिने एव प्रज्ञा प्रतिष्ठिता जायते।

शिक्षा बालकं समाजाय निर्माति सिद्धं च करोति। शिक्षोद्देश्यानि समाजानुगुणं भवन्ति। बालकः स्वविकासेन सह समाजस्य विकासमपि कर्त्तुं प्रभवति। शिक्षकः समाजस्य मूल्यैः, संस्कृत्या, आकांक्षाभिः, परम्पराभिश्च सुपरिचितः स्यात्। एतद् आधारेण समाजस्यावश्यकतानुगुणं बालकानां निर्माणं कर्त्तुं शक्यते। सामाजिकोन्नयनार्थं तस्य विकासः विधीयते।

### ❖ सन्दर्भग्रन्थसूची-


1. हितोपदेशः (मित्रलाभः)- 25
2. श्रीमद्भगवद्गीता-5/5, तत्रैव-5/6
3. श्रीमद्भगवद्गीता- 3/20
4. श्रीमद्भगवद्गीता- 11/55
5. श्रीमद्भगवद्गीता- 12/4
6. श्रीमद्भगवद्गीता- 16/3
7. श्रीमद्भगवद्गीता- 18/47, तत्रैव- 18/48
8. श्रीमद्भगवद्गीता-18/45
9. श्रीमद्भगवद्गीता- 06/17
10. श्रीमद्भगवद्गीता- 02/62, तत्रैव- 02/63